ब्रह्मपुराणम्

अथ त्र्यशीतितमोऽध्यायः
दशाश्वमेधतीर्थवर्णनम्
ब्रह्मोवाच

दशाश्वमेधिकं तीर्थं तच्छृणुष्व महामुने
यस्य श्रवणमात्रेण हयमेधफलं लभेत् १
विश्वकर्मसुतः श्रीमान्विश्वरूपो महाबलः
तस्यापि प्रथमः पुत्रस्तत्पुत्रो भौवनो विभुः २
पुरोधाः कश्यपस्तस्य सर्वज्ञानविशारदः
तमपृच्छन्महाबाहुर्भौवनः सार्वभौवनः ३
यक्ष्येऽहं हयमेधैश्च युगपद्दशभिर्मुने
इत्यपृच्छद्गुरुं विप्रं क्व यक्ष्यामि सुरानिति ४
सोऽवदद्देवयजनं तत्र तत्र नृपोत्तम
यत्र यत्र द्विजश्रेष्ठाः प्रावर्तन्त महाक्रतून् ५

तत्राभवन्नृषिगणा आर्त्विज्ये मखमण्डले
युगपद्दशमेधानि प्रवृत्तानि पुरोधसा ६
पूर्णतां नाययुस्तानि दृष्ट्वा चिन्तापरो नृपः
विहाय देवयजनं पुनरन्यत्र तान्क्रतून् ७
उपाक्रामत्तथा तत्र विघ्नदोषास्तमाययुः
दृष्ट्वापूर्णास्ततो यज्ञान्राजा गुरुमभाषत ८
राजोवाच
देशदोषात्कालदोषान्मम दोषात्तवापि वा
पूर्णतां नाप्नुवन्ति स्म दशमेधानि वाजिनः ९
ब्रह्मोवाच
ततश्च दुःखितो राजा कश्यपेन पुरोधसा
गीष्पतेर्भ्रातरं ज्येष्ठं गत्वा संवर्तमूचतुः १०
कश्यपभौवनावूचतुः
भगवन्युगपत्कार्याण्यश्वमेधानि मानद
दश संपूर्णतां यान्ति तं देशं तं गुरुं वद ११
ब्रह्मोवाच

ततो ध्यात्वा ऋषिश्रेष्ठः संवर्तो भौवनं तदा
अब्रवीद्गच्छ ब्रह्माणं गुरुं देशं वदिष्यति १२
भौवनोऽपि महाप्राज्ञः कश्यपेन महात्मना
आगत्य मामब्रवीच्च गुरुं देशादिकं च यत् १३
ततोऽहमब्रवं पुत्र भौवनं कश्यपं तथा
गौतमीं गच्छ राजेन्द्र स देशः क्रतुपुण्यवान् १४
अयमेव गुरुः श्रेष्ठः कश्यपो वेदपारगः
गुरोरस्य प्रसादेन गौतम्याश्च प्रसादतः १५
एकेन हयमेधेन तत्र स्नानेन वा पुनः
सेत्स्यन्ति तत्र यज्ञाश्च दशमेधानि वाजिनः १६
तच्छ्रुत्वा भौवनो राजा गौतमीतीरमभ्यगात्
कश्यपेन सहायेन हयमेधाय दीक्षितः १७
ततः प्रवृत्ते यज्ञेशे हयमेधे महाक्रतौ
संपूर्णे तु तदा राजा पृथिवीं दातुमुद्यतः १८
ततोऽन्तरिक्षे वागुच्चैरुवाच नृपसत्तमम्
पूजयित्वा स्थितं विप्रानृत्विजोऽथ सदस्पतीन् १९

आकाशवागुवाच

पुरोधसे कश्यपाय सशैलवनकाननाम्

पृथिवीं दातुकामेन दत्तं सर्वं त्वया नृप २०

भूमिदानस्पृहां त्यक्त्वा अन्नं देहि महाफलम्

नान्नदानसमं पुण्यं त्रिषु लोकेषु विद्यते २१

विशेषतस्तु गङ्गायाः श्रद्धया पुलिने मुने

त्वया तु हयमेधोऽयं कृतः सबहुदक्षिणः

कृतकृत्योऽसि भद्रं ते नात्र कार्या विचारणा २२

ब्रह्मोवाच

तथापि दातुकामं तं मही प्रोवाच भौवनम् २३

पृथिव्युवाच

विश्वकर्मज सार्वभौम मा मां देहि पुनः पुनः

निमज्जेऽहं सलिलस्य मध्ये तस्मान्न दीयताम् २४

ब्रह्मोवाच

ततश्च भौवनो भीतः किं देयमिति चाब्रवीत्

पुनश्चोवाच सा पृथ्वी भौवनं ब्राह्मणैर्वृतम् २५

भूम्युवाच

तिला गावो धनं धान्यं यत्किंचिद्गौतमीतटे

सर्वं तदन्नयं दानं किं मां भौवन दास्यसि २६

गङ्गातीरं समाश्रित्य ग्रासमेकं ददाति यः

तेनाहं सकला दत्ता किं मां भौवन दास्यसि २७

ब्रह्मोवाच

तद्भुवो वचनं श्रुत्वा भौवनः सार्वभौवनः

तथेति मत्वा विप्रेभ्यो ह्यन्नं प्रादात्सुविस्तरम् २८

ततः प्रभृति तत्तीर्थं दशाश्वमेधिकं विदुः

दशानामश्वमेधानां फलं स्नानादवाप्यते २९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये दशाश्वमेधतीर्थवर्णनं नाम

त्र्यशीतितमोऽध्यायः ८३

गौतमीमाहात्म्ये चतुर्दशोऽध्यायः १४

नन्दपुराणम्

अध्याय २

ब्रह्मोवाच

कृष्ण परिग्रहे विप्रैः वृद्धि श्राद्धंप्रकल्पितं
ततस्तत्र नांदीमुखानंदवाणा इति स्थिता १
पूर्वाचारं परित्यज्य सृष्टि निर्माण निर्मितौ
स्थापितं धर्मपुण्येन विवेक विविधैः पुरा २
ये केचित् तपो रूपा अयोनि ऋषि संभवा
समानीता महाविप्रा वेदशास्त्रपरायणाः ३
कश्यपस्यकुले जाता जपंतो मानसे सरे
नांदी वर्द्धन नगरे सरयु चंद्र भागयोः ४
उदीच्या ऋषयः सर्वे रथापिता ब्रह्मणा पुरा
स तन्मध्ये पवित्रस्य शरीर धारिणा द्विजाः ५
चतुराशीति स्थानानां विप्राणां स्थाननिर्मित
पावना धर्म पूताश्च सर्व यज्ञ फलप्रदा ६
चतुराशी स्थानकानां आदि निर्माण निर्मितं
उदीच्या भेद संयुक्ता चतुर्विंशति रेव च ७
सारस्वतास्त्रिभिर्भेदै कर्णोजा पंचभिस्तथा
नंदनिका भेदाश्चत्वारः पुष्कराणां त्रयस्तथा ८

गयावाले पंडकानां वारार्धे भ्येमेव च
खेटाग्रामोटकात्रीणी ग्राटापर्टकक स्तथा ९
तैलंगा भेदैरष्टाभिः भरद्वाजा स्तु सप्त च
कर्णाटापल्लिबालानां भेदाएकादशैव च १०
त्रिविधा चतुर्विधामोडा नागरा श्चैवविंशतिः
मंयुवा ग्रार्णवालाश्च वालखिल्या स्त्रिधामताः ११
कंडूलके त्रिभिः प्रोक्तं वायवे याश्च दीक्षिताः
पालिबाले भेद मेकं पालिपोणि पृथक्पृथक् १२
दशतुरापूर्णकीर्णा दीक्षिता भृगुमालयः
ग्रग्रवाल्पल्लीबालाश्च दाधीचा वारिकास्तथा १३
खंडेलशिखपल्लीक वालांतस्तास्त्रिभेदतः
संनाटच मोचकागोडा गुर्जमोडा त्रिधामता १४
श्रीगौडाः श्रीमालश्च इति भेदाः परस्परं
सतीपुरात्रिभिर्भेदैः रोहबालाद्विधातश्रा १५
एतेषां स्थान नामानि भेद संख्यां च मे वद
शेषस्य शासना प्रोक्तां लोकस्थां च प्रवक्ष्यते १६
चतुराशीति स्थानानां ब्रह्मस्थानेषु स्थापनां
तस्याहि तृतीयंस्थानं नांदिनगरमुत्तमं १७

नांदीमुखाभिधानेन नंदवाणा कलौयुगे
शृणु वत्स महाप्राज्ञ नांदि नगर मुत्तमम् १८
आदि विष्णु र्महालक्ष्मी वद्रिकाश्रम निर्मितं
विश्वकर्मा तथाहूतो विष्णुना प्रभविष्णुना १९
सप्तद्वीप वतींपृथ्वीं विलोक्य स्थान मुत्तमं
चतुर्विंशविधाने न मूर्तीनां च समानयः २०
स्थापय त्वं महाविप्रान् ऋृषीणां ऋृषि संभवान्
तपोमूर्तिमहातेजा वेदेशास्त्रपरायणाः २१
प्रवरैश्चैव संयुक्ताश्चतुर्विंशतिगोत्रजाः
विश्वकर्मा व्रजच्छीघ्रं विलोक्य स्थान मुत्तमं २२
विष्णुवाक्यस्य वेगेन भ्रमितोमहि मंडले
विलोक्य आगतः शीघ्रं तदावै विष्णुसंनिधौ २३
करसंपुट संयुक्तः विश्वकर्मा उवाच ह
देवदृष्टां स्थानसर्वं ऋृषीणां ब्राह्मण स्तथा २४
रम्यं देवाभिगंस्थानं किंकरोमि जगत्पते
श्रीकृष्ण उवाच
न विप्र अर्थितं स्थानं विश्वकर्मा विलोक्य सः २५
नांदिमुखा महाविप्रा तत्रस्थान मनुत्तमं
विष्णवेतु इदं वाक्यं विश्वकर्मा ब्रवीदिदं २६

विंध्यस्य पश्चिमे भागे मरुस्थली महायशः
स्वर्गपुराया करेमध्ये सुवीरे कपालेश्वरे २७
त्रिकोणस्थान कं पूर्वं मरुस्थल्याग्नि माश्रितः
पृथिवी मरुस्थली सरः उरसारं यथास्त्रीयः २८
रामेण शोपितो बाणैः दुर्वास ऋषि शापतः
मंडपस्य पदेपूर्वाट् आग्नेयादक्षिणे कुले २९
त्रिकोणं योगिनीचक्रं पुरीवै कालका तथा
तपस्वेद समुत्पन्नौ दैत्यौ वै मधुकैटभौ ३०
विश्वेदेवा पंचमूर्तिः विष्णुरूपा महाबलाः
तस्यतीरे महारम्यं कासारं काननं वनं ३१
द्वात्रिंशद्योजनं संख्या रम्यं पद्मसरोवरं
विश्वकर्माण माहूत आदिदेश हि शीघ्रतः ३२
विश्वकर्मन् मदीयं त्वं वाक्यं कुरु सुसत्वरं
नवयोजन विस्तीर्णं उच्चस्थं पंचयोजनं ३३
काश्मीरं दिव्यप्राकारं षष्ठिद्वादशकोष्टकं
योमन विंशक संयुक्तं क्रोड मध्ये सुविस्तरं ३४
पंचशतं च अश्वाश्च कोष्टोपरि स्थिताः सदा
रक्षार्थं तु प्रयत्नेन नांदीमुखद्विजन्मनाम् ३५
भविष्यंति कलौ मध्ये नंदवाणा इति ख्याताः
प्रसादेन महालक्ष्म्याः नारायण पदाश्रयाः ३६

हेम कलश संयुक्ता सर्वे हेमालयास्तथा
सजलाः शंभुशरणाः शोभनांगनमंडलाः ३७
उदक भैरवं यंत्रं निष्पाण मेघदंदुभिः
पंच भू मंत्रि भूमिश्च सप्तभूमेक विंशति ३८
अश्वशाला गजशाला कामधेनु निवासकं
पाठशाला शयनशाला दोलाभ्रमरपल्लवं ३९
संकेतं देवपूजायां पद्मपाद्यादिकं तथा
अंतरं त्रिकुटी भित्तौ नांदीमुख्यस्य चार्थिनः ४०
कपाटा र्गलसंयुक्तं गवाक्ष जाल मंडपं
तोरणे तोरणे रंभा मुकुटस्तं भमंडपे ४१
वापीकूपतडागादि आरामश्च गृहे गृहे
विमानान् हंससंयुक्तान् पत्रचेकछत्रचामरान् ४२
हेम्ना विरचिता वध्वा दीर्घीका गृहमाश्रिताः
परिवृतं महावृक्षैः रोपितं राजचंपकैः ४३
घृतकुल्या मधुकुल्या अग्निकुंडागृहे गृहे
सुगंध केतकी जाती पटला मरुवकास्तथा ४४
सुवर्ण केतकी जाती मोगरा रजपंचकैः
कल्पवृक्षः कामधेनुः क्षीराब्धी रत्नसंयुतं ४५
एवं नांदीमुखा विप्राः स्थापनीयाः प्रत्नतः
कृष्णस्य वल्लभा ये ते नंदवाणाः कलौ युगे ४६

आराम हारवाणिज्य वस्त्रं पात्रं निजेच्छया
चीर हीरागरं पात्रं एकैकस्य च विंदुके ४७
द्वात्रिंशत् षोडशकं संख्या मलनिक्षालिकास्तथा
कलिकानेक शालायां चत्वरं क्षालनाय च ४८
नीवार वाटिका रम्या कोष्ठे कोष्ठे पुसंभृतं
हेमागारं वज्रयुक्तं कर्तव्यं नंदवाणके ४९
दुर्गात्प्रकोष्ठकस्यो र्ध्वं ध्वजादंडैः सुशोभिताः
कोणे कोणे मतादिव्य नील वदूर्यशोभितं ५०
नांदीमुख महा स्थानं धर्म कामार्थ संभवं
स्थापनीयाः प्रयत्नेन नांदीमुखा भिधानतः ५१
पवित्र मीदृशं स्थानं न भूतं न भविष्यति
महालक्ष्म्याश्च विष्णोश्च भानंद कीर्ति वर्द्ध नं ५२
इत्याकर्ण्य महाविष्णोः पूर्वोक्तं विश्वकर्मणः
विष्णुप्रसादितं वाक्यं विश्वकर्माभि वंदितं ५३

इति श्री नान्दीपुराणे चतुराशीति साहस्त्र्यां संहितायां ब्रह्ममरीचि संवादे ब्रह्मखंडे नांदीमुखवर्जने नंदवाणा महात्म्ये विश्वकर्मणे शिक्षाप्रदान नाम द्वितीयोऽध्यायः

विष्णुमहापुराणम्

बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्म ब्रह्मचारिणी
योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत
प्रभासस्य तु सा भार्या वसूनामष्टमस्य तु ११८
विश्वकर्मा महाभागस्तस्यां जज्ञे प्रजापतिः
कर्ता शिल्पसहस्राणां त्रिदशानां च वार्द्धकिः ११९
भूषणानां च सर्वेषां कर्ताशिल्पवतां वरः
यः सर्वेषां विमानानि देवतानां चकार ह
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः १२०
अजैकपादहिर्बुध्नयस्त्वष्टा रुद्रश्च वीर्यवान्
त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महातपाः १२१
इति श्रीविष्णुपुराणे प्रथमेंशे पंचदशोऽध्यायः १५

तत्र चाऽशेषशिल्पकल्पप्रणेतारं धातारमिवान्यं विश्वकर्माणमाहूय सकलकन्यानामेकैकस्याः प्रोत्फुल्लपंकजाः कूजत्कलहंसकारंडवादिविहंगमाभिरामजलाशयास्सोपधानाः सावकाशास्साधुशय्यापरिच्छदाः प्रासादाः क्रियंतामित्यादिदेश ९७
तच्च तथैवानुष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टा दर्शितवान् ९८
ततः परमर्षिणा सौभरिणाज्ञप्तस्तेषु
इति श्रीविष्णुमहापुराणे चतुर्थांशे द्वितीयोऽध्यायः २

सौरपुराणम्

सूत उवाच -- आह्वानयत्ततो विश्वकर्माणं पर्वतेश्वरः
विवाहमण्डपं कर्तुं नानाश्चर्यविभूषितम् १
तेनाऽऽहुतस्ततः शीघ्रं विश्वकर्मा महामतिः
प्रययौ हिमवत्पार्श्वं कुशलो विश्वकर्मणि २
दृष्ट्वाऽथ विश्वकर्माणं हृष्टः पर्वतराट् स्वयम्
स्वागतासनपाद्याद्यैः सादरस्तमपूजयत् ३
विधिवत्पूजयित्वा तु विश्वकर्माणमब्रवीत् ४
पर्वतराडुवाच -- विश्वकर्मन्महाप्राज्ञ सर्वशास्त्रविशारद
यत्कारणादिहाऽऽहूतो मया त्वं तद्ब्रवीम्यहम् ५
विश्वेश्वरो महादेवो भगवान्नीललोहितः
आगमिष्यति विश्वेशीं परिणेतुं शिवः स्वयम् ६
मण्डपस्तत्र कर्तव्यो यज्ञार्थं हि हिरण्मयः
योजनायुतविस्तीर्णमनेकाश्चर्यसंयुतम् ७
दृष्टमात्रेण सर्वस्य प्रीतिर्भवति वै यथा
तथा त्वं मण्डपं शीघ्रं कुरु विश्वेश्वरप्रियम् ८
एवमुक्तस्तदा तेन गिरिणा विश्वकर्मकृत्
वैवाहं मण्डपं शीघ्रमसृजद्रत्नविग्रहम् ९
स्तम्भैर्हैममयैश्चित्रैर्मणिभिः सूर्यसंनिभैः
इन्द्रनीलमयैर्दिव्यैर्वैदूर्यैर्विद्रुमैरपि १०

मौक्तिकैर्वज्रनीलैश्च चन्द्रकान्तमयैरपि
स्फटिकैर्विद्रुमैश्चापि मुक्तादामविलम्बितैः ११
चामरालकृतैरुच्चैर्दर्पणैर्विविधैरपि
सूर्यबिम्बप्रतीकाशैश्चन्द्रबिम्बसमप्रभैः १२
ध्वजमालाकुलं दिव्यं पताकानेकशोभितम्
रत्नजैः सिंहशार्दूलैर्गजवर्णैर्निरन्तरम् १३
रचितं मण्डपं दिव्यं प्रियं त्रिपुरविद्विषः
रुद्राणां च तथा रूपैर्गन्धर्वाप्सरसां तथा १४
देवैश्चैव मनोहार्यैर्मर्त्यजैश्च तथा परैः
मालाभिः स्तम्बकैर्विप्रा रत्नजैः कुसुमैर्भृशम् १५
क्वचिच्चामीकरेणाथ हृद्यां भूमिं विनिर्ममे
क्वचित्पद्मदलाकारामिन्द्रायुधसमप्रभाम् १६
क्वचिन्नीलोत्पलाभासां नीलजीमूतसप्रभाम्
मनसैव यथा ब्रह्मा विश्वमेतद्धि निर्ममे १७
क्वचिद्बन्धूकसंकाशां दीप्तां विद्रुमसंनिभाम्
अनेकाकारविन्यासैस्ततो धात्रीं विनिर्ममे १८
क्वचित्कलशविन्यासैः क्वचित्स्वस्तिकभूषितैः
हरिचन्दनगन्धाद्यैः कर्पूरोद्गारगन्धिभिः १९

जातीपाटलपद्मानां चम्पकानां सुगन्धिभिः
आसनैर्विविधैः पूतैश्चन्द्रजीमूतसंनिभैः २०
उदयार्कसमाकारैर्मेरुशृङ्गोपमैर्भृशम्
तमालचम्पकाभैश्च इन्द्रनीलमयैस्तथा २१
सिन्दूरचयसंकाशैर्जपाकुसुमसंनिभैः
संध्यारागनिभैश्चान्यैर्दाडिमीकुसुमप्रभैः
हेमकुम्भनिभैश्चान्यैर्मुक्ताफलनिभैरपि २२
तारकापुञ्जसंकाशैः पद्मनीलेन्द्रनीलजैः
तत्रैव मण्डपे दिव्ये तोयस्थानान्यकल्पयत् २३
दीर्घिकास्तोयपूर्णाश्च क्षीरपूर्णास्तथैव च
दधिहृदाननेकांश्च सुधासंपूरितानि वै २४
घृतपूर्णा महानद्यो रत्नसोपानमण्डिताः
वृक्षांश्च कामिकान्दिव्यान्दीर्घिकाणां तथोभयोः २५
असृजत्क्रीडनार्थाय सदा पुष्पफलान्वितान्
भक्ष्यैर्नानाविधैर्दिव्यैः फलितान्मुनिपुंगवाः २६
कदलीखण्डमध्ये तु तमालगहनेष्वपि
क्रीडावाप्यः सुशोभाढ्यास्तथैवाशोकसंकुलाः २७
दीर्घिकाणां तटे रम्ये तरुणाः स्निग्धशाखिषु

दोलाश्चाऽऽबन्धयामासुर्मुक्तादामभिरुज्ज्वलैः २८
रमणीयानि दिव्यानि मनस्तुष्टिकराणि च
उद्यानवनखण्डानि स्थाने स्थाने ह्यकल्पयत् २९
त्रैलोक्यतिलके तस्मिन्हेमपीठस्य मध्यगाम्
सिंहैश्च विधृतां श्वेतैः सहस्रदलमण्डिताम् ३०
पारिजातद्रुमाणां च मञ्जरीभिरलंकृताम्
इन्द्रनीलमयीं वेदिं चारुसोपानभूषिताम् ३१
शतयोजनविस्तीर्णां स्तम्भैश्च कलशान्विताम्
नानानेकाप्सरोभिश्च रत्नजां दिव्यरूपिणीम् ३२
पीनोरुजघनास्ताश्च पीनोन्नतपयोधराः
चामराग्रकरास्तास्तु हारावलिविभूषिताः ३३
वीणावेणुकराश्चान्याः काञ्चीगुणविराजिताः
चञ्चलायतनेत्राश्च तिलकालकमण्डिताः ३४
मध्यक्षामाश्च बिम्बोष्ठीः कमलोत्पलमालिकाः
अनेकाकारविन्यासैर्निर्ममे ताः पृथक्पृथक् ३५
एवं हि दिव्यैः सुरसुन्दरीभिर्नानाप्रयोगैर्विविधैश्च चित्रैः
मनोभिरामैर्नयनाभिरामैर्युक्तान्तवेदिं त्वरितश्चकार ३६ ३०८१
इति सौरपुराणोपपुराणे श्रीसौरे सूतशौनकसंवादे
साम्बविवाहमण्डपवर्णनं नाम षट्पञ्चाशोऽध्यायः ५६

श्रीमद् भागवतमहापुराणम्

श्रीभगवानुवाच
प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया
आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ४७
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः
मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित् ४८
न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक्
तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ४९
स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ५०
मघवन्यात भद्रं वो दध्यञ्चमृषिसत्तमम्
विद्याव्रततपःसारं गात्रं याचत मा चिरम् ५१
स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्
यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ५२
दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम्
विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ५३
युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति
ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः
येन वृत्रशिरो हर्ता मत्तेजौपबृंहितः ५४

तस्मिन्विनिहते यूयं तेजोऽस्त्रायुधसम्पदः
भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ५५
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे नवमोऽध्यायः

पद्ममहापुराणम्

विश्वकर्माप्रभासस्यपुत्रःशिल्पीप्रजापतिः
प्रासादभवनोद्यानप्रतिमाभूषणादिषु २८
तटाकारामकूपेषुत्रिदशानांचवर्द्धकिः
अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः २९
हरश्चबहुरूपश्चत्र्यंबकश्चसुरेश्वरः
सावित्रश्चजयंतश्चपिनाकीचापराजितः ३०
एतेरुद्रास्समाख्याताएकादशगणेश्वराः
एतेषांमानसानांतुत्रिशूलवरधारिणाम् ३१
इति श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेषष्ठोध्यायः ६
एतद्विचिन्त्यमनसाविश्वस्यचमुहुर्मुहुः
विश्वकर्माणमाहूयसवाक्यमिदमब्रवीत् १६०
माधवउवाच-
विश्वकर्मन्महाबाहोमह्यंविष्णोः शिलामयीम्
प्रतिमांदेहिनिर्मायसर्वकामफलप्रदाम् १६१

तस्यादेशात्ततोविप्रशिल्पिनाविश्वकर्मणा
प्रतिमारचितातेनमहाविष्णोःशिलामयी १६२
नवीननीरदश्यामापुण्डरीकनिभेक्षणा
शङ्खचक्रगदापद्मधारिणीच चतुर्भुजा १६३

साम्बपुराणम् नवमोऽध्यायः

मरीचिर्ब्रह्मणः पुत्रो मरीचेः पश्यपः सुतः
तस्माद्धिरन्यकशिपुः प्रह्लादस्तस्य चात्मजः ११
प्रह्लादस्य सुतो नाम्ना विश्रुतोऽथ विरोचनः
विरोचनस्य भगिना संज्ञाया जननी तु सा १२
हिरण्यकशिपोः पौत्री दितेः पुत्रस्य सा स्मृता
सा विश्वकर्मणः पत्नी प्रह्लादा चीच्यते बुधैः १३
अथ नाम्ना सुरूपेति मरीचेर्दुहिता शुभा
पत्नी त्वङ्गिरसः सा तु जननी च वृहस्पतेः १४
वृहस्पतेस्तु भगिनी भुवना ब्रह्मवादिनी
प्रभासस्य च सा पत्नी वसूनामष्टमस्य तु १५
प्रसूता विश्वकर्माणं सर्वशिल्पवतां वरम्
स वै नाम्ना पुनस्त्वष्टा त्रिदशानां स वर्धकिः १६
देवाचार्यस्य तस्येयं दुहिता विश्वकर्मणः
इति श्री साम्बपुराणे राज्ञीनिक्षुभोत्पत्तिर्नाम नवमोऽध्यायः ९

श्रीमात्स्ये महापुराण

विश्वकर्मा प्रभासस्य पुत्रः शिल्पी प्रजापतिः २७
प्रासादभवनोद्यानप्रतिमाभूषणादिषु
तडागारामकूपेषु स्मृतः सोऽमरवर्धकिः २८
इति श्रीमात्स्ये महापुराण आदिसर्गे वसुरुद्रान्वयो नाम
पञ्चमोऽध्यायः ५

श्रीकौर्मे महापुराण

षोडशोऽध्यायः

विश्वकर्मा प्रभासस्य शिल्पकर्त्ता प्रजापतिः १४

आग्नेये पुराणम्

प्रत्यूषाद्देवलो जज्ञे विश्वकर्मा प्रभाषतः
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ४०
मनुष्याश्चोपजीवन्ति शिल्पं वै भूषणादिकम्
सुरभी सश्यपाद्रुद्रानेकादश विजज्ञुषी ४१
महादेवप्रसादेन तपसा भाविता सती
अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च सत्तम ४२
त्वष्टुश्चैवात्मजः श्रीमान्विश्वरूपो महायशाः
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ४३

वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा
मृगव्याधश्च सर्पश्च कपाली दश चैककः
रुद्राणां च शतं लक्षं यैर्व्याप्तं सचराचरम् ४४
आग्नेये जगत्सर्गवर्णनं नाम अष्टादशोऽध्यायः

श्रीब्रह्मांडमहापुराणे

अथ कामेश्वरस्यापि ललितायाश्च शोभनम्
नित्योपभोगसर्वार्थं मंदिरं कर्तुमुत्सुकाः ५
कुमारा ललितादेव्या ब्रह्मविष्णुमहेश्वराः
वर्धकिं विश्वकर्माणं सुराणां शिल्पकोविदम् ६
असुराणां शिल्पनं च मयं मायाविचक्षणम्
आहूय कृतसत्कारानूचिरे ललिताज्ञया ७
अधिकारिपुरुषा ऊचुः
भो विश्वकर्मञ्छिल्पज्ञ भोभो मय महोदय
भवन्तौ सर्वशास्त्रज्ञौ घटनामार्गको विदौ ८
संकल्पमात्रेण महाशिल्पकल्पविशारदौ
युवाभ्यां ललितादेव्या नित्यज्ञानमहोदधेः ९
षोडशीक्षेत्रमध्येषु तत्क्षेत्रसमसंख्यया
कर्तव्या श्रीनगर्यो हि नानारत्नैरलङ्कृताः १०

यत्र षोडशधा भिन्ना ललिता परमेश्वरी
विश्वत्राणाय सततं निवासं रचयिष्यति ११
अस्माकं हि प्रियमिदं मरुतामपि च प्रियम्
सर्वलोकप्रियं चैतत्तन्नाम्नैव विरच्यताम् १२
इति कारणदेवानां वचनं सुनिशम्य तौ
विश्वकर्ममयौ नत्वा व्यभाषेतां तथास्त्विति १३
पुनर्नत्वा पृष्टवन्तौ तौ तान्कारण पूरुषान्
केषु क्षेत्रेषु कर्तव्याः श्रीनगर्यो महोदयाः १४
ब्रह्माद्याः परिपृष्टास्ते प्रोचुस्तौ शिल्पिनौ पुनः
क्षेत्राणां प्रविभागं तु कल्पयन्तौ यथोचितम् १५
इति श्रीब्रह्मांडमहापुराणे उत्तरभागे हयग्रीवागस्त्यसंवादे ललि-
तोपाख्याने मदनपुनर्भवो नाम ऽध्यायः ३१
बृहस्पतेर्या भगिनी वरस्त्री ब्रह्मचारिणी १५
योगसिद्धा जगत्कृत्स्नमसक्ता चरते सदा
प्रभासस्य तु सा भार्या वसूनामष्टमस्य च १६
विश्वकर्मा सुरस्तस्या जातः शिल्पिप्रजापतिः
त्वष्टा विराजो रूपाणि धर्मपौत्र उदारधीः १७

कर्त्ता शिल्पिसहस्राणां त्रिदशानां तु योगतः
यः सर्वेषां विमानानि देवतानां चकार ह १८
मानुषाश्चोपजीवंति यस्य शिल्पं महात्मनः
प्रह्लादी विश्रुता तस्य पत्नी त्वष्टुर्विरोचना १९
विरोचनस्य भगिनी माता त्रिशिरसस्तथा
देवाचार्यस्य महतो विश्वरूपस्य धीमतः २०
विश्वकर्मात्मजश्चैव विश्वकर्मा मयः स्मृतः
सुरेणुरिति विख्याता स्वसा तस्य यवीयसी २१
त्वाष्ट्री या सवितुर्भार्या पुनः संज्ञेति विश्रुता
प्रासूत सा महाभागं मनुं ज्येष्ठं विवस्वतः २२
इति श्रीब्रह्मांडे महापुराणे वायुप्रोक्ते मध्यमभागे तृतीय
उपोद्घातपादऽध्यायः ५९